निर्जेगिल्यते । [1]भावगर्हायाम् इति किम् ? साधु जपति । भावग्रहणम् किम् ? साधनगर्हायां मा भूत्, मन्त्रं जपति वृषलः । नित्यग्रहणं विषयनियमार्थमनुवर्तते । एतेभ्यो [2]नित्यं भावगर्हायामेव [3]भवति, न तु क्रियासमभिहारे । भृशं लुम्पति[4] ॥

## सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् । (२५/२५६३)

[5]सत्यादिभ्यश्चूर्णपर्यन्तेभ्यः, चुरादिभ्यश्च णिच् प्रत्ययो भवति । सत्यमाचष्टे सत्यापयति ।

[१९९] अर्थवेदसत्यानामापुग् [6]वक्तव्यः । (म. भा. २.३०)

[7]अर्थमाचष्टे अर्थापयति । वेदापयति[8] । आपुग्वचनसामर्थ्याट्टिलोपो न भवति (म.भा. २.३४) ।

पाशाद्विमोचने – विपाशयति । [9]रूपाद् दर्शने – रूपयति । [10]वीणयोपगायति उपवीणयति । [11]तूलेनानुकुष्णाति अनुतूलयति । [12]श्लोकैरुपस्तौति उपश्लोकयति । सेनयाभियाति अभिषेणयति । लोमान्यनुमार्ष्टि अनुलोमयति । त्वचं गृह्णाति त्वचयति । अकारान्तस्त्वचशब्दः । वर्मणा [13]सन्नह्यति संवर्मयति । वर्णं गृह्णाति वर्णयति । चूर्णैः [14]अवध्वंसयति अवचूर्णयति । चुरादिभ्यः स्वार्थे । चोरयति । चिन्तयति । स्वाभाविकत्वा-[15]दर्थाभिधानस्य [16]यथास्वं प्रत्ययार्था निर्दिश्यन्ते ॥

## हेतुमति च । (२६/२५७६)

हेतुः स्वतन्त्रस्य कर्तुः प्रयोजकः, तदीयो व्यापारः प्रेषणादिलक्षणो हेतुमान्, तस्मिन्नभिधेये धातोः णिच् प्रत्ययो भवति । कटं कारयति । ओदनं पाचयति ।

[२००] तत्करोतीत्युपसङ्ख्यानं सूत्रयतीत्याद्यर्थम् । (म.भा. २.३४)

सूत्रं करोति सूत्रयति[17] ।

[२०१] आख्यानात्कृतस्तदाचष्ट इति णिच् कृल्लुक् प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकम्[18] । (म.भा.२.३४)

आख्यानात् कृदन्ताण् णिच् वक्तव्यः तदाचष्टे इत्येतस्मिन्नर्थे, [19]कृल्लुक्, प्रकृतिप्रत्यापत्तिः,[20] प्रकृतिवच्च कारकं भवति । कंसवधमाचष्टे [21]कंसं घातयति । [22]बलिबन्धमाचष्टे बलिं बन्धयति । राजागमनमाचष्टे राजानमागमयति (म.भा. २.३४) ।

---

1. गर्हायाम् फ. ह. 2. नित्यं नास्ति फ, नित्यभावगर्हायाम् ह. 3. यङ् इत्यधिकम् क. 4. इति इत्यधिकम् फ. ह. 5. सत्याप पाश रूप वीणा तूल श्लोक सेना लोम त्वच वर्म वर्ण चूर्ण इत्येतेभ्यः फ. ह. 6. वा क. 7. अर्थमाचष्टे नास्ति क. फ. ह. 8. सत्यापयति इत्यधिकम् फ. 9. रूपदर्शने ह. 10. वीणया उपगाने क. 11. तूलैः क, तूलैरवकुष्णाति अवतूलयति ड, तूलेनावकुच्चायति ब. 12. श्लौकैरुपस्तौति नास्ति फ. 13. सन्नह्यते ड. 14. अवध्वंसति ड. 15. °अर्थाभिधेयस्य फ. 16. यथायथं प्रत्ययार्थो निर्दिश्यते अ.ग.ड.ह. 17. मूत्रयति इत्यधिकम् क. ग. 18. भवति इत्यधिकम् ग. फ. 19. कृतः लुक् क. 20. च इत्यधिकम फ. 21. कंसं नास्ति फ. 22. बलिबन्धमाचष्टे नास्ति फ.